श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ अष्टात्रिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ अष्टात्रिंशः सर्गः ॥

## श्रीरामेण जनकयुधाजित्प्रतर्दनप्रभृतीनां भूपानां स्वदेशे प्रस्थापनम्

एवमास्ते महाबाहुरहन्यहनि राघवः।
प्रशासत् सर्वकार्याणि पौरजानपदेषु च॥ **7.38.1** ॥

ततः कतिपयाहःसु वैदेहं मिथिलाधिपम्।
राघवः प्राञ्जलिर्भूत्वा वाक्यमेतदुवाच ह॥ **7.38.2** ॥

भवान् हि गतिरव्यग्रा भवता पालिता वयम्।
भवतस्तेजसोग्रेण रावणो निहतो मया॥ **7.38.3** ॥

इक्ष्वाकूणां च सर्वेषां मैथिलानां च सर्वशः।
अतुलाः प्रीतयो राजन् सम्बन्धकपुरोगमाः॥ **7.38.4** ॥

तद् भवान् स्वपुरं यातु रत्नान्यादाय पार्थिव।
भरतश्च सहायार्थं पृष्ठतश्चानुयास्यति॥ **7.38.5** ॥

स तथेति ततः कृत्वा राघवं वाक्यमब्रवीत्।
प्रीतोऽस्मि भवता राजन् दर्शनेन नयेन च॥ **7.38.6** ॥

यान्येतानि तु रत्नानि मदर्थं सञ्चितानि वै।
दुहित्रे तान्यहं राजन् सर्वाण्येव ददामि वै॥ **7.38.7** ॥

एवमुक्त्वा तु काकुत्स्थं जनको हृष्टमानसः।
प्रययौ मिथिलां श्रीमांस्तमनुज्ञाय राघवम्॥ **7.38.8** ॥

ततः प्रयाते जनके केकयं मातुलं प्रभुम्।
राघवः प्राञ्जलिर्भूत्वा विनयाद् वाक्यमब्रवीत्॥ **7.38.9** ॥

इदं राज्यमहं चैव भरतश्च सलक्ष्मणः।
आयत्तस्त्वं हि नो राजन् गतिश्च पुरुषर्षभ॥ **7.38.10** ॥

राजा हि वृद्धः सन्तापं त्वदर्थमुपयास्यति।
तस्माद् गमनमद्यैव रोचते तव पार्थिव॥ **7.38.11** ॥

लक्ष्मणेनानुयात्रेण पृष्ठतोऽनुगमिष्यते।
धनमादाय बहुलं रत्नानि विविधानि च॥ **7.38.12** ॥

युधाजित् तु तथेत्याह गमनं प्रति राघव।
रत्नानि च धनं चैव त्वय्येवाक्षय्यमस्त्विति॥ **7.38.13** ॥

प्रदक्षिणं च राजानं कृत्वा केकयवर्धनः।
रामेण च कृतः पूर्वमभिवाद्य प्रदक्षिणम्॥ **7.38.14** ॥

लक्ष्मणेन सहायेन प्रयातः केकयेश्वरः।
हतेऽसुरे यथा वृत्रे विष्णुना सह वासवः॥ **7.38.15** ॥

तं विसृज्य ततो रामो वयस्यमकुतोभयम्।
प्रतर्दनं काशिपतिं परिष्वज्येदमब्रवीत्॥ **7.38.16** ॥

दर्शिता भवता प्रीतिर्दर्शितं सौहृदं परम्।
उद्योगश्च त्वया राजन् भरतेन कृतः सह॥ **7.38.17** ॥

तद् भवानद्य काशेय पुरीं वाराणसीं व्रज।
रमणीयां त्वया गुप्तां सुप्राकारां सुतोरणाम्॥ **7.38.18** ॥

एतावदुक्त्वा चोत्थाय काकुत्स्थः परमासनात्।
पर्यष्वजत धर्मात्मा निरन्तरमुरोगतम्॥ **7.38.19** ॥

विसर्जयामास तदा कौसल्याप्रीतिवर्धनः।
राघवेण कृतानुज्ञः काशेयो ह्यकुतोभयः॥ **7.38.20** ॥

वाराणसी ययौ तूर्णं राघवेण विसर्जितः।
विसृज्य तं काशिपतिं त्रिशतं पृथिवीपतीन्॥ **7.38.21** ॥

प्रहसन् राघवो वाक्यमुवाच मधुराक्षरम्।
भवतां प्रीतिरव्यग्रा तेजसा परिरक्षिता॥ **7.38.22** ॥

धर्मश्च नियतो नित्यं सत्यं च भवतां सदा।
युष्माकं चानुभावेन तेजसा च महात्मनाम्॥ **7.38.23** ॥

हतो दुरात्मा दुर्बुद्धी रावणो राक्षसाधमः।
हेतुमात्रमहं तत्र भवतां तेजसा हतः॥ **7.38.24** ॥

रावणः सगणो युद्धे सपुत्रामात्यबान्धवः।
भवन्तश्च समानीता भरतेन महात्मना॥ **7.38.25** ॥

श्रुत्वा जनकराजस्य काननात् तनयां हृताम्।
उद्युक्तानां च सर्वेषां पार्थिवानां महात्मनाम्॥ **7.38.26** ॥

कालोऽप्यतीतः सुमहान् गमनं रोचयाम्यतः।
प्रत्यूचुस्तं च राजानो हर्षेण महता वृताः॥ **7.38.27** ॥

दिष्ट्या त्वं विजयी राम स्वराज्येऽपि प्रतिष्ठितः।
दिष्ट्या प्रत्याहृता सीता दिष्ट्या शत्रुः पराजितः॥ **7.38.28** ॥

एष नः परमः काम एषा नः प्रीतिरुत्तमा।
यत् त्वां विजयिनं राम पश्यामो हतशात्रवम्॥ **7.38.29** ॥

एतत् त्वय्युपपन्नं च यदस्मांस्त्वं प्रशंससे।
प्रशंसार्हं न जानीमः प्रशंसां वक्तुमीदृशीम्॥ **7.38.30**॥

आपृच्छामो गमिष्यामो हृदिस्थो नः सदा भवान्।
वर्तामहे महाबाहो प्रीत्यात्र महता वृताः॥ **7.38.31**॥

भवेच्च ते महाराज प्रीतिरस्मासु नित्यदा।
बाढमित्येव राजानो हर्षेण परमान्विताः॥ **7.38.32**॥

ऊचुः प्राञ्जलयः सर्वे राघवं गमनोत्सुकाः।
पूजितास्ते च रामेण जग्मुर्देशान् स्वकान् स्वकान्॥ **7.38.33**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे अष्टात्रिंशः सर्गः॥